# Shri Ganesha Panchachamara Stotram 1

# શ્રીગણેશપઞ્ચચામરસ્તોત્રમ્ ૧

## Document Information

Text title : Ganesha Panchachamara Stotram 1

File name : gaNeshapanchachAmarastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : umApatisharmadvivedi

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : September 02, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2025

*sanskritdocuments.org*

Shri Ganesha Panchachamara Stotram 1

# શ્રીગણેશપઞ્ચચામરસ્તોત્રમ્ ૧

શ્રીગણેશાય નમઃ ।
લલાટ-પટ્ટલુણ્ઠિતામલેન્દુ-રોચિરુદ્ભટે
વૃતાતિ-વર્ચરસ્વરોત્સરત્કિરીટ-તેજસિ ।
ફટાફટત્ફટત્સ્ફુરત્ફણાભયેન ભોગિનાં
શિવાઙ્કતઃ શિવાઙ્કમાશ્રયચ્છિશૌ રતિર્મમ ॥ ૧॥

અદભ્ર-વિભ્રમ-ભ્રમદ્-ભુજાભુજઙ્ગફૂત્કૃતી-
ર્નિજાઙ્કમાનિનીષતો નિશમ્ય નન્દિનઃ પિતુઃ ।
ત્રસત્સુસઙ્કુચન્તમમ્બિકા-કુચાન્તરં યથા
વિશન્તમદ્ય બાલચન્દ્રભાલબાલકં ભજે ॥ ૨॥

વિનાદિનન્દિને સવિભ્રમં પરાભ્રમન્મુખ-
સ્વમાતૃવેણિમાગતાં સ્તનં નિરીક્ષ્ય સમ્ભ્રમાત્ ।
ભુજઙ્ગ-શઙ્કયા પરેત્યપિત્ર્યમઙ્કમાગતં
તતોઽપિ શેષફૂત્કૃતૈઃ કૃતાતિચીત્કૃતં નમઃ ॥ ૩॥

વિજૃમ્ભમાણનન્દિ-ઘોરઘોણ-ઘુર્ઘુરધ્વનિ-
પ્રહાસ-ભાસિતાશમમ્બિકા-સમૃદ્ધિ-વર્ધિનમ્ ।
ઉદિત્વર-પ્રસૃત્વર-ક્ષરત્તર-પ્રભાભર-
પ્રભાતભાનુ-ભાસ્વરં ભવસ્વસમ્ભવં ભજે ॥ ૪॥

અલઙ્ગૃહીત-ચામરામરી જનાતિવીજન-
પ્રવાતલોલિ-તાલકં નવેન્દુભાલબાલકમ્ ।
વિલોલદુલ્લલલ્લલામ-શુણ્ડદણ્ડ-મણ્ડિતં
સતુણ્ડ-મુણ્ડમાલિ-વક્રતુણ્ડમીડ્યમાશ્રયે ॥ ૫॥

પ્રફુલ્લ-મૌલિમાલ્ય-મલ્લિકામરન્દ-લેલિહા
મિલન્ નિલિન્દ-મણ્ડલીચ્છલેન યં સ્તવીત્યમમ્ ।
ત્રયીસમસ્તવર્ણમાલિકા શરીરિણીવ તં

સુતં મહેશિતુર્મતઙ્ગજાનનં ભજામ્યહમ્ ॥ ૬॥

પ્રચણ્ડ-વિઘ્ન-ખણ્ડનૈઃ પ્રબોધને સદોદ્ધુરઃ
સમર્દ્ધિ-સિદ્ધિસાધનાવિધા-વિધાનબન્ધુરઃ ।
સબન્ધુરસ્તુ મે વિભૂતયે વિભૂતિપાણ્ડુરઃ
પુરસ્સરઃ સુરાવલેર્મુખાનુકારિસિન્ધુરઃ ॥ ૭॥

અરાલ-શૈલબાલિકા-ઽલકાન્તકાન્ત-ચન્દ્રમો-
જકાન્તિસૌધ-માધયન્ મનોઽનુરાધયન્ ગુરોઃ ।
સુસાધ્ય-સાધવં ધિયાં ધનાનિ સાધયન્નય-
નશેષલેખનાયકો વિનાયકો મુદેઽસ્તુ નઃ ॥ ૮॥

રસાઙ્ગયુઙ્ગ-નવેન્દુ-વત્સરે શુભે ગણેશિતુ-
સ્તિથૌ ગણેશપઞ્ચચામરં વ્યધાદુમાપતિઃ ।
પતિઃ કવિવ્રજસ્ય યઃ પઠેત્ પ્રતિપ્રભાતકં
સ પૂર્ણકામનો ભવેદિભાનન-પ્રસાદભાક્ ॥ ૯॥

છાત્રત્વે વસતા કાશ્યાં વિહિતેયં યતઃ સ્તુતિઃ ।
તતશ્છાત્રૈરધીતેયં વૈદુષ્યં વર્દ્ધયેદ્ધિયા ॥ ૧૦॥

॥ ઇતિ શ્રીકવિપત્યુપનામક-ઉમાપતિશર્મદ્વિવેદિ-વિરચિતં
ગણેશપઞ્ચચામરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Shri Ganesha Panchachamara Stotram 1*

pdf was typeset on May 10, 2025

Please send corrections to *sanskrit@cheerful.com*